E-ISSN-2584-2870 https://doi.org/10.65833/dbs.2026.326

केन्द्रीयसंस्कृतविश्वविद्यालयः
श्रीरघुनाथकीर्तिपरिसरः, देवप्रयागः
देवभूमि-सौरभम्
Devabhūmisaurabham
E-ISSN 2584-2870

Vol 3 Issue 1 Jan-June 2026 Devabhūmisaurabham International Journal of CSU Shri Raghunath Kirti Campus Devprayag Uttarakhand India

# छन्दोदृष्ट्या भावश्रीरिति काव्यग्रन्थः

**शोधच्छात्रः**
योगेश भारद्वाजः
डी.ए.वी महाविद्यालयः
बुलन्दशहरम्

**मार्गदर्शकः**
डा. सत्यकान्तः
संस्कृतविभागे सहायकाचार्यः
डी.ए.वी. महाविद्यालयः
बुलन्दशहरम्

**शोधसारः** :

अस्मिन् शोधपत्रे "भावश्री" इति काव्यग्रन्थस्य छन्दोदृष्ट्या सम्यक् अध्ययनं कृतम्। संस्कृतकाव्यपरम्परायाः प्राचीनकालादारभ्य अद्यतनपर्यन्तं प्रवाहः संक्षेपेण निरूपितः। कविहिमांशुगौडस्य काव्यप्रतिभा तथा तस्य रचनासु निहितवैशिष्ट्यं विवेचितम्। "भावश्री" ग्रन्थस्य पत्रकाव्यरूपता तथा तत्र निहितं काव्यसौन्दर्यं विशदतया प्रकाश्यते। छन्दशास्त्रस्य सामान्यपरिचयः वेदाङ्गरूपेण प्रस्तुतः तथा पिङ्गलाद्याचार्याणां मतानुसारं छन्दसां भेदाः संक्षेपेण निरूपिताः। ग्रन्थे अनुष्टुप्, वसन्ततिलका, मालिनी, इन्द्रवज्रा, उपजाति, शिखरिणी इत्यादीनां विविधछन्दसां प्रयोगः दृष्टः, येन कवेः छन्दोनिपुणता प्रकाशते। प्रत्येकछन्दसः लक्षणानि उदाहरणैः सह निरूपितानि सन्ति। एतेन छन्दवैविध्यस्य माध्यमेन काव्यसौन्दर्यवृद्धिः स्पष्टतया प्रतिपादिता। अन्ते "भावश्री" ग्रन्थस्य छन्दशास्त्रीयमहत्त्वं तथा तस्य अध्ययनयोग्यता प्रतिपन्ना।

**मुख्यशब्दाः** :

छन्दः, काव्यशास्त्रम्, भावश्रीग्रन्थः, हिमांशुगौडः, पत्रकाव्यम्, संस्कृतसाहित्यपरम्परा, छन्दोविचारः, वृत्पद्यम्, जातिपद्यम्, काव्यसौन्दर्यम्, छन्दवैविध्यम्।

**भूमिका –**

प्राचीनकालादारभ्य अद्यावधिं यावत् शोभमानायां देववाणीकाव्यरचनापरम्परायां दिनं दिनं नव्यत्वं श्रीयते । संस्कृतसाहित्यं वाल्मीकेरभ्य अधुनापर्यन्तं नव्यत्वमापाद्य प्रवहमानं दृश्यते । वैदिकसाहित्यमतिरिच्य आदिकवेः वल्मीकादारभ्य कविकुलगुरुकालिदासबाणभारविदण्डिभासादिकविभ्यः प्रवहन्ती काव्यधारेयं नाद्यापि विरलायिता । अद्यापि रमाकान्तशुक्ल-अभिराजराजेन्द्रमिश्र-निरञ्जनमिश्र-सदृक्षैस्सहस्रशः कविभिः विभिन्नकाव्यरचनाभिस्संस्कृतस्य साहित्ये नव्याभिवृद्धिः क्रियते । अस्यामेव परम्परायां गङ्गातटग्रामजन्मना काव्यप्रतिभोत्कर्षवता हिमांशुगौडमहाशयेन शतशः काव्यानि विरचितानि सन्ति तेष्वेव कानिचिद् अप्रकाशितानि, कानिचिच्च प्रकाश्यङ्गतानि दृश्यन्ते । अस्य कवेः भावश्रीरिति पत्रकाव्यसङ्ग्रहः वन्द्यश्रीरिति वन्दनाभिनन्दनादिकाव्यसङ्ग्रहः काव्यश्रीरिति बहुविधकाव्यसङ्ग्रहश्च वर्तते। एतदतिरिच्यानेन शतककाव्यान्यपि कृतानि क्रियन्ते च। एतद्रचितेषु शतकेषु प्रामुख्येन – बाबागुरुशतकम्, पितृशतकम्, गणेशशतकम्, सूर्यशतकम्, कल्पनाकारशतकम्, समर्थश्रीशतकम्, यज्ञसम्राट्शतकम् इत्यादीनि दृग्गोचराणि भवन्ति। न केवलमस्य काव्यानि सरलपद्धतिसृतान्यपितु , अस्य काव्येषु विद्वत्प्रौढत्त्वमपि बहुत्र दृश्यते । अस्य रचितेषु श्लोकेषु नव्यत्वमनुभूयते , शास्त्रप्रागल्भ्यं जोघुष्यते विन्मनस्सन्तुष्यते, कविताप्राञ्जुलता दृश्यते । क्वचित् प्रकृतिवर्णनं क्वचिल्लोकदशानिदर्शनं क्वचित्परपीडाज्ञापनं क्वचिज्जगदाधृत्य कवेर्दार्शनिकदृष्टिः, क्वचिच्छास्त्रीयपक्षनिरूपणम् , क्वचिदात्मीयस्वरूपचिन्तनम् , क्वचिन्मनस्युदितभावानां सौष्ठवरीत्या प्रतिपादनं, क्वचित् कल्पनानां वैचित्र्यञ्चाप्यस्य काव्येषु दरीदृश्यते ।

अस्य काव्येषु भावश्रीरिति यो ग्रन्थो वर्तते, स वर्तते विभिन्नविद्वन्मित्रकव्यादिपरिचितेभ्यः लिखितभावपत्रसङ्कलनात्मकः , किन्तु पत्रमिति निर्देशस्तु नाममात्रमेव । वस्तुतो पत्रव्याजेन प्रतिपदमत्र स्वप्रतिभायाः प्रदर्शनं विधत्तमस्ति । स्वकल्पनानां प्रकर्षता प्रादर्शि । स्वशास्त्रीय-लौकिक-पौराणिक-काव्यादि-सम्बन्धिज्ञानानां वैशिष्ट्यं च दक्षतया विभिन्नच्छन्दोबद्धश्लोकैः प्रदर्शितमिति। कवेर्हिमांशुगौडस्याध्ययनस्थलं वर्तते नरवराख्यम् । अतस्तस्य काव्येषु बहुत्र तत्स्थलस्य गुणानां तत्रत्यवैदुष्यस्य चर्चा च विधत्ता । यद्यपि भावश्रीग्रन्थे प्रायस्सर्वेषामेव काव्यशास्त्रीयतत्त्वानामुपस्थितिर्दृश्यते तथाप्यत्र वयं भावश्रीग्रन्थे प्रयुक्तानां छन्दसां सन्दर्भे किञ्चित्पश्यामः -

**काव्यशास्त्रदृष्ट्या सामान्यतः छन्दःपरिचयः -**

छन्दांसि विविधानि सन्ति। काव्यकरणविधौ तानि चोपयुज्यन्ते। षट्सु वेदाङ्गेषु पादत्वेन छन्दः ख्यापितम्। यथा - छन्दः पादौ तु वेदस्य इति पाणिनिशिक्षोक्तेः। छदि आच्छादने[1] इति धातोः छन्दश्शब्दस्य निष्पत्तिर्भवति। शौनकविरचिते प्रातिशाख्येऽपि छन्दसां बहु विवेचनं प्राप्यते। आचार्यपिङ्गलकृतं पिङ्गलच्छन्दःसूत्रम् इति छन्दोज्ञानकरणाय विशिष्टो ग्रन्थो वर्तते। अस्मिन् लौकिकानां वैदिकानाञ्चापि छन्दसां विवेचनमस्ति। छन्दश्शास्त्रम् अतिप्राचीनमस्ति। यास्काचार्यकृते निरुक्ते तथैव ब्राह्मणग्रन्थेषु चापि

[1] चुरादि.धातु. 1-10

छन्दश्शब्दस्य बहुविधं निर्वचनं कृतम्। मानवान् पापकर्मभ्यः छादयन्ति छन्दासि इति छन्दः - इत्यैतरेयारण्यके प्रोक्तम्। तथैव - **देवा छन्दोभिरात्मानं छादयित्वोपायंस्तच्छन्दसां छन्दस्त्वम्**[2] - इति तैत्तिरीयसंहितायामुक्तम्। चदि आह्लादे इति धातोः **चन्देरादेश्च छः**[3] इत्युणादिसूत्रेण चकारस्य छकारे कृते चादयति आह्लादयतीति छन्दः इति प्रकारद्वयेनापि विद्वांसो व्युत्पत्तिं कुर्वन्ति। **यदक्षरसङ्ख्यापरिमाणं तच्छन्दः**[4] इति ऋक्सर्वानुक्रमण्याम्। वेदपुरुषस्य पादत्त्वेन छन्दश्शास्त्रस्य ग्रहणं भवति- छन्दः पादौ तु वेदस्य।[5]

लौकिकवैदिकप्रकारद्वयेन हि छन्दांसि विभक्तानि। लौकिकच्छन्दांसि पिङ्गलाद्याचार्यानुसारेण मात्रवर्णभेदेन प्रकारद्वयस्य भवति। यथा ह्युक्तं वृत्तरत्नाकरे -

**पिङ्गलादिभिराचार्यैर्यदुक्तं लौकिकं द्विधम्।**

**मात्रावर्णविभेदेन च्छन्दस्तदिह कथ्यते।।**[6]

**पद्यस्य लक्षणम् -**

पद्यलक्षणं छन्दोमञ्जरीग्रन्थे - पद्यं चतुष्पदी। चतुर्णां पदानां समाहारः - चतुष्पदी इत्यत्र समाहार्थे ई प्रत्ययः वर्तते। गङ्गादासानुसारेण छन्दश्शास्त्रस्य पारिभाषिकपादचतुष्टयस्य समाहाररूपे यद् वाङ्मयं तदेव काव्यं भवति। एवञ्च पद्यमेतत् प्रकारद्वयस्य भवति। प्रथमं तावत् वृत्तपद्यं, द्वितीयञ्च जातिपद्यम्। तत्र अक्षरगणघटितं पद्यं वृत्तमुच्यते तथा मात्रागणघटितं पद्यं जातिरुच्यते। वृत्तपद्यस्योदाहरणं वर्तते वसन्ततिलका इत्यादयः, तथा जातिच्छन्दसः उदाहरणत्वेन सन्ति - आर्यादयः - इत्येतत् छन्दोमञ्जर्यामुक्तम् -

**पद्यं चतुष्पदी तच्च वृत्तं जातिरिति द्विधा।**

**वृत्तमक्षरसङ्ख्यातं जातिर्मात्रा कृता भवेत्।।**[7]

अस्य भावार्थानुसारं छन्दः पद्यबद्धं भवति। छन्दोमञ्जर्यामुक्तं यत् चतुर्णां पदानां एकं पद्यं भवति।एवञ्च पद्यं प्रकारद्वयात्मकं भवति। वृत्तपद्यं जातिपद्यं च। अक्षराणां निर्दिष्टसङ्ख्यातः नियमितं निबद्धं च पद्यं वृत्तपद्यमुच्यते। अक्षरसङ्ख्यातैः अक्षरैः एकद्वि इत्यादिवर्णैस्सङ्ख्यातं परिगणितं च यत् तद् वृत्तं भवति।

**भावश्रीरिति ग्रन्थे छन्दसां समीक्षा -**

ग्रन्थेऽस्मिन् अनुष्टुप्-वसन्ततिलका-मालिनी-इन्द्रवज्रा-उपजाति-शिखरिणी-द्रुतविलम्बित -भुजङ्गप्रयात-पञ्चचामर-स्रग्विणी-स्रग्धरा-शार्दूलविक्रीडितानां छन्दसां प्रयोगः कविना कृतः । अनेन कवेः छन्दोरचनानैपुण्यं विज्ञायते । अत्र केषाञ्चित् छन्दसां लक्षणान्युदाहरणानि च दर्श्यन्ते -

---

[2] तैत्ति.सं. 5-6-6-1

[3] उणा.सू. 4-219

[4] ऋक्सर्वा० 2-6

[5] पाणि.शि. 41-42 श्लोकौ

[6] वृत्तरत्नाकरः 1.4

[7] छन्दोमञ्जरी प्रथमस्तबकः 4 श्लोकः https://archive.org/details/chando_manjari_hindi/page/n19/mode/2up?view=theater

**भावश्रीग्रन्थे अनुष्टुप् –**

**लक्षणम् –**

**श्लोके षष्ठं गुरु ज्ञेयं सर्वत्र लघु पञ्चमम्।**

**द्विचतुष्पादयोर्ह्रस्वं सप्तमं दीर्घमन्ययोः॥**[8]

अर्थात् श्लोके षष्ठाक्षरः गुरुस्स्यात् तथा चतुर्ष्वपि पादेषु पञ्चमाक्षरः लघुस्स्यात्। सप्तमाक्षरः द्वितीये चतुर्थे च पादे ह्रस्वः तथा प्रथमतृतीययोः पादयोः दीर्घस्स्यात्।

अभिराजराजेन्द्रमिश्राय लिखिते पत्रे अन्तिमपद्ये लेखनहेतुं निरूपयति अनुष्टुप्छन्दसा -

**विद्वद्भ्यः पत्रदाने हि रुचिर्मे वर्ततेऽधुना।**

**अतः कविप्रसिद्धाय तनिरेषा समर्प्यते॥११॥**[9]

अत्र प्रत्येकं पादे अष्टौ अक्षराणि सन्ति। सर्वत्र पञ्चमाक्षरं लघु अस्ति। श्लोके त्र-र्त-प्र-स- इत्येतानि पञ्चमाक्षराणि लघूनि सन्ति। तथैव षष्ठाश्रराणि – दा-ते-सिद्-मर् – इत्येतानि षष्ठाक्षराणि दीर्घाणि सन्ति। सप्तमाक्षरः द्विचतुष्पादयोः ह्रस्वः – धु-य। तथा सप्तमाक्षरः प्रथमतृतीयपादयोः दीर्घः – ने-द्धा – एवं सूत्रघटितत्वादत्र अनुष्टुप्छन्दः।

**भावश्रीग्रन्थे वसन्ततिलका –**

लक्षणम् – उक्ता वसन्ततिलका तभजाजगौ गः[10]

मात्राः - ऽऽ। ऽ।। ।ऽ। ।ऽ। ऽऽ

तगण-भगण-जगण-जगण-गुरु-गुरु

प्रो.वाचस्पतिमिश्राय लिखितपत्रेऽस्योदाहरणं पश्यामः –

**कुत्र भ्रमानि मुहुरेव किमुत्सृजानि ,**

**किं शब्दरूप इव वा करवाणि वायौ**

**भ्रान्तोऽप्यदृश्य इव वा मनसां विरूपैः,**

**संलोकते क्वचिदनाप्तसुवर्णलोकान्॥**[11]

---

[8] श्रुतबो. 10

[9] भावश्रीः 36 पृ.

[10] वृत्तरत्नाक. 3-79

[11] भावश्रीः 129 पृ.

**भावश्रीग्रन्थे मालिनी -**

लक्षणम् – ननमयययुतेयं मालिनी भोगिलोकैः[12]

मात्राः - ।।। ।।। ऽऽऽ ऽ।ऽ ऽ।ऽ ऽ

यतिः – 8,7

नगण-नगण-मगण-रगण-रगण-गुरु

अस्मिन् छन्दसि पञ्चदशाक्षराणि भवन्ति।

श्रीमन्महेशझाभ्यो लिखितपत्रे निजजन्म काव्यकल्पनात्मकं दर्शयति मालिनीबद्धपद्येन -

**सुरवरशुभभाले शोभमानाद्धिमांशोः,**

**विगलितकररूपैश्श्रीशिवप्रीतिभाजां**

**द्विजकुलपदनिष्ठप्राप्तकाव्यैकभावो**

**जनित इव विबोध्यो गौड एवं हिमांशुः॥[13]**

**भावश्रीग्रन्थे इन्द्रवज्रा –**

**लक्षणम्** – स्यादिन्द्रवज्रा यदि तौ जगौ गः।

स्वामिश्रीस्वरूपानन्दसरस्वतीमहाराजेभ्यः लिखितपत्रे प्रथमश्लोकम् इन्द्रवज्राबद्धं प्रस्तौति –

**श्रीशङ्कराचार्य! गुरोऽस्मदीयं, हृज्जातभावं च भवान् शृणोतु**

**धर्मस्य चर्चां च करोमि काञ्चिच्चाधर्मरूपाण्यपि संसृतानि॥[14]**

**भावश्रीग्रन्थे उपजातिः –**

लक्षणम् –अत्र इन्द्रवज्रोपेन्द्रवज्रेति द्वयोरेव छन्दसोः पादाः सन्ति अत एतदुपजातिरित्युच्यते। तथोक्तं रत्नाकरे –

**अनन्तरोदीरितलक्ष्मभाजौ पादौ यदीयावुपजातयस्ताः**[15]

अक्षराणि – अत्र प्रतिपादम् एकादशाक्षराणि सन्ति।

**आदौ भवत्पादसरोजसक्तः,**

**प्रणम्य भक्त्या भुवि भक्तवृन्दम्**

**श्रीभारतस्याऽखिलधर्मविभ्राड् ,**

---

[12] वृत्तरत्ना. 3-87

[13] भावश्रीः 167 पृ.

[14] भावश्रीः 149 पृ.

[15] वृत्तरत्ना. 35 पृ

**भवान् जनेभ्यश्शिवदो विभाति॥**[16]

**भावश्रीग्रन्थे शिखरिणी-**

लक्षणम् – रसै रुद्रैश्छिन्ना यमनसभलागा शिखरिणी[17]

मात्राः - ।ऽऽ ऽऽऽ ।।। ।।ऽ ऽ।। ।ऽ

यतिः – अत्र षष्ठाक्षरे यतिर्भवति।

प्रो. जनार्दनमणिपाण्डेयाय लिखितपत्रे शिखरिणीप्रयोगो लोक्यते -

**तदा मत्काव्यानि श्रुतिनतिपराणीह भवता**

**विलोक्यावोच्येतन्मम शुभभविष्यैषणमपि**

**मयाऽर्कस्य श्रीमत्कमलपतिसूर्यस्य शतकम्**

**श्रितं यत्तच्चाद्य प्रणतिपरवाचा विरचितम्॥**[18]

**भावश्रीग्रन्थे द्रुतविलम्बितम् –**

**तल्लक्षणम्** - द्रुतविलम्बितमाह नभौ भरौ।[19]

सन्दीपोनियालाय लिखितं सम्पूर्णं पत्रम् अस्मिन्नेव छन्दसि वर्तते -

**अलिकुला सुमनोल्लसिता लता**

**विहगरावरतं नवलं वनम्**

**मधुमये मधुवर्षिसुहर्षिणी**

**जलसरी सुसरो जलजैर्युतम्॥**[20]

**भावश्रीग्रन्थे भुजङ्गप्रयातम् –**

**लक्षणम् –** भुजङ्गप्रयातं चतुर्भिर्यकारैः। अत्र प्रत्येकं पादे 12 अक्षराणि भवन्ति।

उदाहरणम् -

---

[16] भावश्रीः 149 पृ.

[17] वृत्तरत्नाक. 3-93

[18] भावश्रीः 100 पृ.

[19] वृत्तरत्नाकरः 3-50

[20] भावश्रीः 106 पृ.

**अहो क्षुद्रजीव्यं तथा नैकदृष्टिः**

**पुनश्श्वासविप्रत्ययस्यात्र यात्रा**

**वृथा क्रोधकामाकुलः लोभकारी**

**निपत्यापि कूपे विनश्येच्च नैजम्॥**[21]

**भावश्रीग्रन्थे पञ्चचामरम्-**

**तल्लक्षणम् -** जराजराजगाविदं वदन्ति पञ्चचामरम्।[22]

अस्मिन् छन्दसि प्रतिपादं 16 अक्षराणि सन्ति।

उदाहरणम् -

**अतो विवस्वतश्शती कृता मया नतेस्ततिः**

**प्रसादमाप्य मत्प्रभां प्रवर्धयेच्च भास्करः ।**

**मुदाऽर्चनैकपद्धतिस्सृता कवित्त्वसंश्रिता,**

**प्रिया हि मालिनीनिबद्धचेतसा सुमङ्गला॥**[23]

**भावश्रीग्रन्थे स्रग्विणी-**

**लक्षणम् –** रैश्चतुर्भिर्युता स्रग्विणी सम्मता।[24]

डॉ.अखिलेशत्रिपाठिने लिखितपत्रे अस्य प्रयोगः दृष्टः -

**सर्वनीतिं निशायां दिवायां च वा**

**चर्चयन् मोदमाप्तो हिमांशुर्हि यो**

**तुभ्यमद्यास्ति पद्यार्पणे संरतः**

**तान्यहान्यद्य सुस्मारयेत्सोऽत्र वै॥**[25]

**भावश्रीग्रन्थे स्रग्धरा –**

---

[21] भावश्रीः 84 पृ.

[22] वृत्तरत्नाकरः 3-89

[23] भावश्रीः 101 पृ.

[24] वृत्तरत्नाकरः 3-56

[25] भावश्रीः 113 पृ.

तल्लक्षणम् – म्रभ्नैर्यानां त्रयेण त्रिमुनियतियुता स्रग्धरा कीर्तितेयम्[26]

मात्राः - ऽऽऽ ऽ।ऽ ऽ।। ।।। ।ऽऽ ।ऽऽ ।ऽऽ

मगण-रगण-भगण-नगण-यगण-यगण-यगण

छन्दस्यस्मिन् एकविंशत्यक्षराणि भवन्ति।

यतिः – अत्र प्रथमा यतिः सप्तमाक्षरे भवति। द्वितीया चतुर्दशाक्षरे, तृतीया एकविंशत्यक्षरे भवति। (सप्त,चतुर्दश,एकविंशतिः)

श्रीत्र्यम्बकेश्वचैतन्यमहाराजाय लिखितपत्रेऽस्य प्रयोगो दृश्यते –

**लालित्यैरक्षरैश्च प्रतिपदमनिशं मोहभङ्गैकनिष्ठैः**

**ताराम्बायास्स्तवोऽहो लसति नवपदस्थापितश्रद्धया च**

**यात्राभिर्दर्शनाद्यैर्विविधकलनदक्षस्य चित्तानुसारी**

**सद्भावानां प्रथापि प्रवहति बहुधा त्र्यकम्बकस्य प्रभावात्॥**[27]

**भावश्रीग्रन्थे शार्दूलविक्रीडितम् –**

**लक्षणम् -** सूर्याश्वैर्मसजास्ततः सगुरवः शार्दूलविक्रीडितम्[28] –

प्रतिपादम् एकोनविंशाक्षराणि सन्ति।

मात्राः - ऽऽऽ ।।ऽ ।ऽ। ।।ऽ ऽऽ। ऽऽ। ऽ

मगण-सगण-जगण-सगण-तगण-तगण-गुरु

यतिः – 6-8-12

डॉ.योगेशाय लिखितपत्रे भोपालनिवासकालं स्मारणावसरे शार्दूलविक्रीडितप्रयोग इत्थं कृतो लोक्यते -

**यातानीव दिनानि शीघ्रगतिभिर्वर्षत्रयस्यात्र वै**

**अद्यापीव तुदेत् सुखस्मृतिरहो विद्युच्चले जीवने**

**शोधच्छात्रतया त्वया च मयका कालश्शुभैर्यापितः**

**सङ्गीतादिकसक्तकाव्यरसिकैश्श्रीशैलजापूजया॥**[29]

---

[26] वृत्तरत्ना. 3-102

[27] भावश्रीः 103 पृ.

[28] वृत्तरत्नाक. 3-99

[29] भावश्रीः 116 पृ.

एवमस्माभिर्दृष्टं यद् भावश्रीग्रन्थः न केवलं वर्णनात्मकदिशाऽपितु छन्दःप्रयोगदृष्ट्याऽपि समृद्धः। छन्दसां वैविध्येन स्थले स्थले यथोचितप्रयोगकारणाद् भावश्रीग्रन्थोऽधुनातने काले काव्यक्षेत्रे विशिष्टं स्थानं दधाति। छन्दोऽध्ययनकामिभिरस्य ग्रन्थस्य पठनेन किमपि नूतनं सौख्यं लब्धुं शक्यत इति शोधकर्तुर्विश्वासः।

**सन्दर्भग्रन्थसूचिः -**


| | | | |
|---|---|---|---|
| तैत्तिरीयसंहिता | अज्ञातः | भारतमुद्रणालय, पारडीनगरम् | 1957 |
| ऋक्सर्वानुक्रमणी | | रामलाल कपूर ट्रस्ट https://www.exoticindiaart.com/book/details/katyayaniya-rk-sarvanukramani-nzf013/ | 1984 |
| पाणिनीयशिक्षा | पाणिनिः, व्याख्याकारः - कमलाप्रसादपाण्डेयः | विश्वविद्यालय प्रकाशन, वाराणसी | 2003 (प्रथमसंस्करणम्) |
| पाणिनी अष्टाध्यायी सूत्रपाठ | पाणिनिः | वेङ्कटेश्वर मुद्रणालय, मुम्बई | संवत् 1954 |
| वृत्तरत्नाकरः | भट्टकेदारः | चौखम्बा संस्कृत सीरीज ऑफिस, वाराणसी | 1984 |
| छन्दोमञ्जरी | गङ्गादासः | चौखम्बा सुरभारती प्रकाशन, वाराणसी https://archive.org/details/chando_manjari_hindi/mode/2up | |
| छन्दश्शास्त्रम् (तृतीयसंस्करणम्) | पिङ्गलाचार्यः | निर्णयसागर प्रेस, मुम्बई | 1938 |
| भावश्रीः (पत्रकाव्यसङ्ग्रहः) | हिमांशुगौडः | टू ह्यूमेनिटी फाउण्डेशन, गाजियाबाद | 2020 |
| श्रुतबोधः (नारायणपण्डितप्रणीतसंस्कृतटीकया, रत्नप्रभाख्यहिन्दीटीकया च युक्ता) | कालिदासः | निर्णयसागर प्रेस, मुम्बई | 1939 |